# ॥ वैद्यनाथाष्टकम् ॥

श्रीराम सौमित्रि जटायुवेद षडाननादित्य कुजार्चिताय।
श्रीनीलकण्ठाय दयामयाय श्रीवैद्यनाथाय नमः शिवाय॥ १ ॥

गङ्गाप्रवाहेन्दु जटाधराय त्रिलोचनाय स्मरकालहन्त्रे।
समस्त देवैः रवि पूजिताय श्रीवैद्यनाथाय नमः शिवाय॥ २ ॥

भक्तप्रियाय त्रिपुरान्तकाय पिनाकिनी दुष्टहराय नित्यम्।
प्रत्यक्ष लीलाय मनुष्यलोके श्रीवैद्यनाथाय नमः शिवाय॥ ३ ॥

प्रभूतवातादि समस्तरोग प्रणाशहन्त्रे मुनिवन्दिताय।
प्रभाकरेन्द्वग्नि विलोचनाय श्रीवैद्यनाथाय नमः शिवाय॥ ४ ॥

वाक्श्रोत्रनेत्रान्घ्रि विहीनजन्तुः वाक्श्रोत्रनेत्रान्घ्रि सुखप्रदाय।
कुष्टादि सर्वोन्नत रोगहन्त्रे श्रीवैद्यनाथाय नमः शिवाय॥ ५ ॥

वेदान्तवेद्याय जगन्मयाय योगीश्वरध्येय पदाम्बुजाय।
त्रिमूर्तिरूपाय सहस्र नाम्ने श्रीवैद्यनाथाय नमः शिवाय॥ ६ ॥

स्वतीर्थमृत् भस्म भृदाङ्गभाजा पिशाच दुःखार्ति भयापहाय।
आत्मस्वरूपाय शरीरभाजा श्रीवैद्यनाथाय नमः शिवाय॥ ७ ॥

श्रीनीलकण्ठाय वृषध्वजाय स्रक्गन्ध भस्माद्यभि शोभिताय।
सुपुत्रदारादि सुभाग्यदाय श्रीवैद्यनाथाय नमः शिवाय॥ ८ ॥